महेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारिपात्रश्च कैलासो मन्दरस्तथा ॥
लोकालोको महांस्तेद्व तथैवोत्तरमानसः ।
एते विंशतिर्विख्याताः पर्व्वतास्तस्थुषां वराः ॥”

जम्बुद्वीपवर्षविभाजकपर्व्वता यथा,—
“लङ्कादेशाद्धिमगिरिरुदक् हेमकूटश्च तस्मा-
त्तस्माच्चान्यो निषध इति ते सिन्धुपर्य्यन्तदैर्घ्याः ।
एवं सिद्धादुदगपि पुराच्छृङ्गवच्छुक्लनीला
वर्षाण्येषां जगुरिह बुधा अन्तरे द्रौणिदेशान् ॥”
इति सिद्धान्तशिरोमणिः ॥ * ॥

पर्व्वतानां पक्षोत्पत्तिर्यथा,—
“ततोऽद्रयो जातपक्षा विष्णोश्चैव तु मायया ।
प्रस्थिता मेदिनीं त्यक्त्वा यथापूर्व्वं निवेशिताः ॥
तत् स्थानमसुराणान्तु धात्रादिष्टं जलार्णवे ।
शतीर्थाः पर्व्वताः सर्व्वे निममज्जुर्यथा गजाः ॥
तत्रासुरेभ्यः शंसुस्ते आधिपत्यं सुराश्रयम् ।
तच्छ्रुत्वैवासुराः सर्व्वे चक्रुरुद्योगमुत्तमम् ॥*॥”

युद्धजयानन्तरं तेषां पक्षोच्छेदो यथा,—
“शरणयान्तु गिरीन् स्थाप्य स्वेषु स्थानेषु गोःपतिः ।
चिच्छेद पविना पक्षान् सर्व्वेषां भुवि चारिणाम् ॥
एकः सपक्षो मैनाकः सुरैस्तत्समये हृतः ॥”
इत्यग्निपुराणम् ॥ * ॥

पर्व्वतानां स्थावरजङ्गमरूपे यथा,—
“नद्यश्च पर्व्वताः सर्व्वे द्विरूपाश्च स्वभावतः ।
तोयं नदीनां रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूपं कायस्तथापरः ।
शुक्तीनामथ कम्बूनां तथैवान्तर्गता तनूः ॥
वहिरस्थिस्वरूपन्तु सर्व्वदैव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आप्याय्यते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्याय्यते सदा ।
नदीनां कामरूपित्वं पर्व्वतानान्तथैव च ॥
जगत्स्थित्यै: पुरा विष्णुः कल्पयामास यत्नतः ।
तोयहानौ नदीदुःखञ्जायते सततन्द्विजाः ॥
विशीर्णे स्थावरे दुःखं जायते गिरिकायगम् ॥”
इति कालिकापुराणे २२ अध्यायः ॥*॥

अतः परं पर्व्वतेषु देवानामवकाशा वर्ण्यन्ते । तत्र योऽसौ शान्ताख्यः पर्व्वतस्तस्योपरि महेन्द्रस्य क्रीड़ास्थानं तत्र देवराजस्य पारिजातकहृषवनम् । तस्य पूर्व्वपार्श्वे कुञ्जरो नाम गिरिः तस्योपरि दानवानामष्टौ पुराणि च । तथा वज्रकेतुपर्व्वते राक्षसानामनेकानि पुराणि ते च नाम्ना नीलकाः कामरूपिणः महानीले च शैलेन्द्रे पुराणि पञ्चदशसहस्राणि किन्नराणां ख्यातानि तत्र देवताश्चन्द्रादयो राजानः पञ्चदश किन्नराणां गर्व्विताः तानि सौवर्णानि विलप्रवेशनानि च पुराणि चन्द्रोदये च पर्व्वतवरे नागानामधिवासः ते च विलप्रवेशासेवितेषु वैनतेयविषयावर्ज्जिनो व्यवस्थितानुरागे च दानवेन्द्रा व्यवस्थिता वेणुवत्यपि विद्याधरपुरत्रयं त्रिंशद्योजनशतविस्तीर्णमेकैकं तावदायतं उलूकरोमससममहावेत्रादयश्च राजानो विद्याधराणाञ्च एकैके च शैलराजनि स्वयमेव गरुड़ो व्यवस्थितः । कुञ्जरे तु पर्व्वतवरे नित्यं पशुपतिः स्थितः वृषभाङ्को महादेवः शङ्करो योगिनां प्रभुः अनेकगणभूतकोटिसहस्रपरिवारो भगवानादिपुरुषो व्यवस्थितः । वसुधारे चायुष्मतां वसूनाञ्च समावासः वसुधाररत्नधारयोर्म्मूर्द्ध्नि अष्टौ सप्त च संख्यया पुराणि वसुसप्तर्षीणाञ्च । एकशृङ्गे च पर्व्वतोत्तमे प्रजापतेः स्थानं चतुर्व्वक्त्रस्य ब्रह्मणः । गजपर्व्वते च महाभूतपरिवृता स्वयमेव भगवती तिष्ठति । वसुधारे च पर्व्वतवरे मुनिसिद्धविद्याधराणामायतनं चतुरशीत्यपरपुर्य्यो महाप्राकारतोरणाः तत्र चानेकपञ्चता नाम गन्धर्व्वा युद्धशालिनो वसन्ति तेषाञ्चाधिपतिर्देवो राजराजैकपिङ्गलः । सुरराक्षसाः पञ्चकूटे दानवाः शतशृङ्गे यक्षाणां पुरशतम् । प्रभेदकस्य पश्चिमेन देवदानवसिद्धादीनां पुराणि तस्य गिरेर्म्मूर्द्ध्नि महती सोमशिला तिष्ठति तस्याञ्च पर्व्वणि पर्व्वणि सोमः स्वयमेवावतरति । तस्यैवोत्तरपार्श्वे त्रिकूटं नाम तत्र ब्रह्मा तिष्ठति क्वचित्तत्र च वह्न्यायतनं तत्र मूर्त्तिमान् वह्निरुपास्यते देवैः । उत्तरे च शृङ्गाख्ये पर्व्वतवरे देवतानामायतनानि पूर्व्वेण नारायणस्यायतनं मध्ये ब्रह्मणः शङ्करस्य च पश्चिमे तत्र यक्षादीनां कानिचित् पुराणि । तस्य चोत्तरतीरे जातुक्रमहापर्व्वते त्रिंशद्योजनमण्डलं नन्दजं नाम सरस्तत्र नन्दो नाम नागराजो वसति शतशीर्षप्रचण्ड इति । इत्येतेऽष्टौ देवपर्व्वता विज्ञेयाः तेनानुक्रमेण हेमरजतरत्नवैदूर्य्यमनःशिलादिवर्णाः । इयञ्च पृथ्वी लक्षकोटिशतानेकसंख्याता पूर्णा तेषु च सिद्धविद्याधराणां निलयाः । तद्यथा मेरोः पार्श्वतः केशरवलयालवालं सिद्धलोकेति कीर्त्त्यते इयञ्च पृथ्वी पद्माकारेण व्यवस्थिता एष सर्व्वपुराणेषु क्रमः सामान्यः प्रतिपाद्यते । इति वराहपुराणम् ॥ *॥

हिमालयादिपर्व्वतवासिनो यथा,—
“रक्षःपिशाचा यक्षाश्च सर्व्वे हैमवतास्तु ते ।
हेमकूटे तु गन्धर्व्वा विज्ञेयाश्चाप्सरोगणाः ॥
सर्व्वे नागाश्च निषधे शेषवासुकितक्षकाः ।
महामेरौ त्रयस्त्रिंशत् क्रीड़न्ते याज्ञिकाः सुराः ॥
नीले तु वैदूर्य्यमये सिद्धा ब्रह्मर्षयोऽवसन् ।
दैत्यानां दानवानाञ्च श्वेतपर्व्वत उच्यते ॥
शृङ्गवान् पर्व्वतश्रेष्ठः पितॄणां प्रतिसञ्चरः ।
इत्येतानि मयोक्तानि नव वर्षाणि भागशः ॥”
इति मात्स्ये ६५ अध्यायः ॥ * ॥

अथ पर्व्वतनदीजलगुणाः ।
“हिमवत्प्रभवा याश्च जलं तास्वमृतोपमम् ।
पारिपात्रभवा याश्च विन्ध्यर्क्षप्रभवाश्च याः ॥
शिरोहृद्रोगकुष्ठानां ता हेतुः श्लीपदस्य च ।
चन्द्रार्ककरसंस्पृष्टं वायुनास्फालितं मुहुः ॥
पर्व्वतोपरि यद्वारि समं पौरन्दरेण तत् ।
तस्यानुगुणमुद्दिष्टं शैलप्रस्रवणोद्भवम् ॥
लेखनं दीपनं रूक्षं किञ्चिद्वातप्रकोपणम् ॥”
इति राजवल्लभः ॥ * ॥

पर्व्वते वर्णनीयानि यथा,—
“शैले मेघौषधीधातुवंशकिन्नरनिर्झराः ।
शृङ्गपादगुहारत्नवनजीवाद्युपत्यकाः ॥”
इति कविकल्पलता ॥ * ।

अथ कैलासपर्व्वतवर्णनम् ।

“मध्ये हिमवतः पृष्ठे कैलासो नाम पर्व्वतः ।
तस्मिन्निधिपतिः श्रीमान् कुवेरः सह राक्षसैः ॥
अप्सरःसहितो राजा मोदते ह्यलकाधिपः ।
कैलासपादसम्भूतं पुण्यं शीतजलं शुभम् ॥
मन्दोदकं नाम सरः पयस्तु दधिसन्निभम् ।
तस्मात् प्रभवते दिव्या नदी मन्दाकिनी शुभा ॥
दिव्यञ्च चन्दनन्तत्र तस्यास्तीरे महद्वनम् ।
प्रागुत्तरेण कैलासं दिव्यं सौगन्धिकं गिरिम् ॥
सर्व्वधातुमयं दिव्यं शवलं पर्व्वतं प्रति ।
चन्द्रप्रभो नाम गिरिः शुशुभे रत्नसन्निभः ॥
तत्समीपे सरो दिव्यमच्छोदन्नाम विश्रुतम् ।
तस्मात् प्रभवते दिव्या नदी ह्यच्छोदका शुभा ॥
तस्यास्तीरे वनं दिव्यं महच्चैत्ररथं शुभम् ।
तस्मिन् गिरौ निवसति मणिभद्रः सहानुगः ॥
यक्षसेनापतिः क्रूरैर्गुह्यकैः परिवारितः ।
पुण्या मन्दाकिनी चैव नदी ह्यच्छोदका शुभा ॥
महीमण्डलमध्ये तु प्रविष्टा तु महोदधिम् ।
कैलासाद्दक्षिणप्राच्यां शिवं सर्व्वौषधिं गिरिम् ।
मनःशिलामयं दिव्यं शवलं पर्व्वतं प्रति ॥
लोहितो हेमशृङ्गस्तु गिरिः सूर्य्यप्रभो महान् ।
तस्य पादे महद्दिव्यं लोहितं सुमहत् सरः ॥
तस्मात् प्रभवते पुण्यो लोहितश्च नदो महान् ।
देवारण्यं विशोकञ्च तस्य तीरे महद्वनम् ॥
तस्मिन् गिरौ निवसति यक्षो मणिधरो वशी ।
सौम्यैः स धार्म्मिकैश्चैव गुह्यकैः परिवारितः ॥*॥
कैलासात् पश्चिमोदीच्यां ककुद्मानोषधीगिरिः ॥
ककुद्मति च रुद्रस्य चोत्पत्तिस्त्रिककुद्मिनः ।
तदञ्जनं त्रैककुदं शैलं त्रिककुदं प्रति ॥
सर्व्वधातुमयस्तत्र सुमहद्वैद्युतो गिरिः ।
तस्य पादे महद्दिव्यं मानसं सिद्धसेवितम् ॥
तस्मात् प्रभवते पुण्या सरयूर्लोकपावनी ।
तस्यास्तीरे वनं दिव्यं वैभ्राजन्नाम विश्रुतम् ।
कुवेरानुचरस्तस्मिन् प्रहेतितनयो वशी ।
नाम्ना वै ब्रह्मधामेति राक्षसोऽनन्तविक्रमः ॥*।
कैलासात् पश्चिमामाशां दिव्यः सर्व्वौषधिर्गिरिः
अरुणः पर्व्वतश्रेष्ठो रुक्मधातुविभूषितः ॥
भवस्य दयितः श्रीमान् पर्व्वतो हेमसन्निभः ।
शातकौम्भमयैर्दिव्यैः शिलाजालैः समन्ततः ॥
शतसंख्यैस्तापनीयैः शृङ्गैर्दिवमिवोल्लिखन् ।
युक्तवान् सुमहद्दिव्यैर्दुर्गशैलो महोच्छ्रितः ॥
तस्मिन् गिरौ निवसति गिरीशो धूम्रलोहितः ॥
तस्य पादे महद्दिव्यं सरः काञ्चनवालुकम् ॥
तस्य पादात् प्रभवति शैलोदं नाम तत् सरः ।
तस्मात् प्रभवते पुण्या नदी शैलोदका शुभा ॥
सा वङ्क्षुशीतयोर्मध्ये प्रविष्टा पश्चिमोदधिम् ।